Bipolar Nature of Reality – An-International Journal
(BNRAIJ) 2016 Vol.2, Issue No. 1, JAN-JUNE.
ISSN 2394-6059

# आध्यात्मिकप्रज्ञायाः सम्प्रत्ययीकरणम्

**प्रेम प्रकाश पाण्डेय**
**शोधच्छात्र**
**रा.सं.सं. भोपाल परिसर**

## संक्षिप्तीकरणम्

शिक्षा जीवने निरन्तरं प्रचाल्यमाना सार्वभौमिकप्रक्रिया वर्तते। सभ्यभाषानुकरणीयव्यवहारोच्चादर्शमूल्यानि च प्रदत्वा शिक्षा व्यक्तित्वं श्रेष्ठत्वं प्रयच्छति। विद्यालयेषु महाविद्यालयेषु च दीयमाना शिक्षा छात्रेषु सभ्यतया सह मानवीयानाम आध्यात्मिकानां मूल्यानां प्रेरणां दत्त्वा शोधकर्तारं ताः परिस्थितीन् प्रति नयति यत्र ते मानवरूपेण स्वोत्कृष्टं योगदानं प्रदानाय सर्मर्थाः भवेयुः । शिक्षां मस्तिष्कस्यात्मनिर्माणस्य च कारकं मत्वा अरविन्दमहोदयेन ब्रुते – शिक्षा मस्तिष्कस्यात्मशक्तेः च निर्माणेन सह ज्ञानस्य चरित्रस्य सस्कृत्याः च उत्कर्षं विद्धाति। सर्वमिदं यदा हि सम्भाव्यते यदा शिक्षायामाध्यमिकतायः प्रधानता भवति। वर्तमानभौतिकवादीयुगे छात्राणां शारीरिकमानसिकविकासयोः बलं दीयते परं छात्राणाम् आध्यात्मिकविकासे समूचितबलं नैव दीयते। यस्य परिणामत्वेन युववर्गः धैर्यविहीनः भावनाशून्यः स्वस्थस्पर्द्धारहितः भौतिकवादी वर्तते यो परिश्रमं विना महत्त्वाकाङ्क्षां प्राप्तुमिच्छति। युववर्गः राष्ट्रस्य कर्णधारः विद्यते यतः तेषु युवसु एव राष्ट्रस्य प्रगतेः दायित्वं वर्तते। अतो आवश्यकतेयम् अस्ति वर्तमानशिक्षायां छात्राणाम् आध्यात्मिकप्रज्ञायाः विकासे पर्याप्तबलं दातव्यं येन भारतदेशाय समाजस्य उत्तमकर्णधाराः सज्जीभवितुं शक्यते। एवम् विचिन्त्य आध्यात्मिकप्रज्ञायाः सम्प्रत्ययीकरणं जनहिताय प्रयासितः।

## आध्यात्मिकप्रज्ञा–

**भारतीयपरिप्रेक्ष्ये आध्यात्मम् –** अधि +आत्मः इत्यनयोर्योगः वर्तते। अर्थात् यः आत्मानं अधिकृत्य स्थरि भवति सो आध्यात्ममुच्यते।

वामनशिवरामाप्टे महोदयेनस्वकीये संस्कृत- आंङ्गलशब्दकोशे निरूपितः

आध्यात्मशब्दः –

1. Relating to the supreme spirit - परमशक्तिसंबद्धः
2. Spiritual holy - पूर्णतयात्मिकम् / आध्यात्मिकम्
3. Relating to self – आत्मनः सम्बद्धः

अर्थात् –आत्मनापरमात्मना च सम्बद्धात्मानमधिकृत्य निर्दिष्ट्वा गुणः वा स्वभावो स्थिरो भवति तद् आध्यात्ममिति कथ्यते । श्रीमदभगवत्गीतायाम् अष्टमेऽध्याये अर्जुनेन प्रश्नः कृतः –

**किं तद् ब्रह्म किं आध्यात्मन, किं कर्म पुरूषोत्तम् ।**
**अधिभूतं च किं प्रोक्तः, अधिदैव किम् उच्यते ।।**

अर्थात् ब्रह्मः नाम किम ? किं नाम अध्यात्मम् ? कर्मं किम् ? अधिभूतं अधिदैवं नाम किम् ?

एतेषां प्रश्नानामुत्तरप्रदानाय श्रीकृष्णेनोक्तम्

**अक्षरं परं ब्रह्म, स्वभावो आध्यात्ममुच्यते ।**
**भूत भावो दुष्करो विसर्गः कर्म सञ्ज्ञितः ।।**

अर्थात् – परमेश्वरस्य प्रत्येक शरीरे अन्तरात्मरूपेण स्थितः यः स्वभावः भवति । सः स्वभावः एव अध्यात्मः इति ।

पातञ्जलयोगशास्त्रे समाधिपादे आध्यात्मसस्य वर्णनं वर्तते ।

**निर्विचारवैशारधेऽध्यात्मप्रसादः ।।**[1]

अर्थात् – निर्विचारवैशारद्येन आध्यात्मम् आगच्छति। तात्पर्यमिदं यत् रजोगुणतमोगुणश्चाऽभावे बुद्धेः यः प्रकाशस्य उद्धभवति तदेव आध्यात्मं कथ्यते। कठोपनिषद्ग्रन्थेष्वपि आध्यात्मशब्दस्य वर्णनं लभ्यते। यस्यवर्णनं शोधप्रबन्धे मया कृतम्।

अतः अध्यात्मविषये वक्तुं शक्यते यत् आत्मना परमात्मना सह सम्बद्धाः प्रेम- श्रद्धा- विश्वास- संयम- नैतिका- साधना- योग- ब्रह्मचर्यादयाः गुणाः मानवेषु विद्यमानाः भवन्ति ते सर्वेऽपि आध्यात्मे अन्तर्भवन्ति ।

## प्रज्ञा–

प्रज्ञाविषये वक्तुं शक्यते । अस्माभिर्ज्ञायते यत् यदा बुद्धिः निर्मला भवति तदा शुद्धानाम् उचितानाञ्च विचाराणामुद्धवः भवति । परन्तु प्रज्ञायाः स्तरं बुद्धिरपेक्षयाः उत्कृष्टं भवति । सामान्यरूपेण बुद्धि –प्रज्ञा परस्परपर्यायः मन्यते । परन्तु द्वयोर्मध्ये सूक्ष्मभेदो भवति यत् बुद्धिस्तु कामक्रोधलोभाभिः शत्रुभिः प्रभाविता भवति परन्तुप्रज्ञायां स्थिरता भवति या सर्वदा सत्यमनुसरति।

पातञ्जलयोगदर्शने आध्यात्मविषये वर्णनमस्ति । यद् बुद्धिप्रज्ञामध्ये भेदं स्पष्टयति – **"निर्विचारवैशारद्येऽध्यात्मप्रसादः"** निष्कर्षः अयं यत् निर्विचारसमाप्तेः ऋतुम्भराप्रज्ञा श्रुत अनुमानप्राप्तसाधारणप्रज्ञा च अत्यन्तपृथकपदार्थौ स्तः । यथा पङ्कयुक्तजले उपलनिर्मलजले च यादृशो भेदो भवति तादृशो भेदो हि बुद्धि- प्रज्ञायोः मन्तव्यम् अर्थात् प्रज्ञा

---
[1] पा.यो.द. समाधिपादः – 47

 ISSN 2394-6059

स्वच्छजलसादृशो बुद्धिपङ्किल जलादृशी च भवतः च। अत्र ज्ञानस्यचरमोत्कर्षावस्थायाः समाधिस्थप्रज्ञानस्य निर्विचारवैशारधारे प्राप्तज्ञानं ऋतम्भरा प्रज्ञा इति कथ्यते।
योगसूत्रे प्रज्ञायै ऋतम्बरा शब्दः प्रयुक्तः पतञ्जलिना – **"ऋतम्भरा तत्र प्रज्ञा"**[2]
अर्थात् - आध्यात्मप्रसादावस्थायां या प्रज्ञा भवति तस्याः नाम ऋतम्भरा वा सत्यपूर्णा वर्तते । सा प्रज्ञा अन्तर्था नाम्नी प्रसिद्धाः वर्तते। ऋतम्भराप्रज्ञा सत्यं धारयति। ऋतम्भराप्रज्ञायां विपर्यायस्य किञ्चित मात्र प्रवेशो अपि न भवति। एवम ज्ञायते यौगिनः आगमेन अनुमानेन आदरपूर्वकेण च प्रज्ञोत्पाद्य उत्तमं योगं प्राप्नुवन्ति।
निष्कर्षत्वेन वक्तुं शक्यते निर्विचारसमाधिना विषयस्य यद् ज्ञानं भवति तस्याऽपेक्षया उत्तमज्ञानं विधिना न संभवति। अतएव मिदं सम्पूर्ण सत्यं ज्ञानं भवति। ऋत् शब्दस्यार्थो भवति साक्षातानुभूति। ऋतम्भरायाः तात्पर्यं सत्यस्य धारयित्री प्रज्ञा। प्रज्ञायाः तात्पर्यं समाधिजन्यबुद्धिः। ऋतम्भरा सत्यताधारयित्री अविद्यारहिता बुद्धिः वर्तते। अतः स्पष्टीयते यत् प्रज्ञाउच्चस्तरीया बुद्धिः भवति।

श्रीमद्भगवतगीतायां प्रज्ञाशब्दस्य प्रयोगः स्थितप्रज्ञस्य सन्दर्भे कृतः। यथा -

**स्थितप्रज्ञस्य का भाषा समाधिस्थस्य केशव ।**
**स्थितधीः किं प्रभासते किमासीत् ब्रजेत किम् ।।**[3]

अर्जुनः कथयति हे केशव! स्थितप्रज्ञस्य का भाषा भवति। परमात्मनि स्थितस्य स्थिरबुद्धिमतः पुरुषस्य किं लक्षणम्? सः कथं वदति? कथं चलति? कथं उपविशति? तथा च कथं व्यवहर्रति? स्पष्टयताम्।

भगवतकृष्णेनोक्तम्–

**प्रजहाति यदा कामान्सवीम्पार्थ मनोगतान् ।**
**आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ।।**
**दुःखेषुद्विग्नमनः सुखेषु विगतस्पृहः ।**
**वीतरागभयक्रोधः स्थितधीर्मुनिरूच्यते ।।**
**यः सर्वत्रानभिस्नेहस्तत्प्राप्य शुभाशुभम् ।**
**नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता ।।**
**यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।**
**इन्द्रियाणिन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता।।**

श्रीकृष्णेनोक्तं हे अर्जुनः! यदा साधकपुरुषः मानसिकसमस्तकामनानां परित्यागं कृत्वा स्वकीयेन स्वकीयात्मचिन्तने सन्तुष्टो भवति तदा स्थितप्रज्ञो इति कथ्यते। दुःखेषु येषु उद्वेगः न भवति तथा च येषां मनसि सुखेषु स्पृहा नोत्पद्यते इत्युक्ते समानस्थितिः भवति। रागद्वेषभयक्रोधेभ्यः यो विरतः भवति स एव स्थिरबुद्धिधारी इति

---

[2] प.यो.दर्शन समाधिपाद -48

[3] श्री.मद.भग.गीता 2/54

उच्यते। आसक्तिविहीनः यो मनुष्यः शुभाशुभं प्राप्य न प्रसन्नः भवति न हि द्वेषं प्रकटयति तस्य बुद्धिः स्थिरा मन्यते। यथा कच्छपः स्वकीयङ्गानि स्वशरीरे अन्तस्थं करोति तथा एव पुरूषः अपि इन्द्रियान् विषयेभ्यः दूरी करोति ।

उपरोक्तश्लोकेषु स्थिरबुद्धिमतः याः विशेषताः वर्णिताः ताः सर्वाऽपि प्रज्ञायाः विशेषताः मन्तव्याः । यतोहि प्रज्ञा वासनाकामनाभ्यः मुक्ता भवति । सा ईश्वरभक्त्यां निमग्ना भवति । प्रज्ञायां सुख- दुःख- लाभ- हानिः- जय-पराजयः- रागद्वेषेत्यादिगुणावगुणानां प्रभावो न भवति ।

उपरोक्तवर्णितस्थिरबुद्धेः लक्षणानि प्रज्ञायाः प्रसाद गुणाः सन्ति ।

अतः निष्कर्षत्वेन वक्तुं शक्यते यत् सामान्यबुद्धेः तुलनायां प्रज्ञा सत्यनिष्ठा सेश्वरप्रेमयुक्ता सर्वाभ्यः निम्नप्रवृत्तीभ्यः मुक्ता निर्मला च बुद्धिर्विद्यते।

## आध्यात्मिकप्रज्ञा

आध्यात्मिकप्रज्ञा शब्दः आध्यात्मिक + प्रज्ञा शब्दाभ्यां युक्तो वर्तते । आध्यात्मिकशब्दस्याऽर्थो आत्मना परमात्मना सम्बद्धाः प्रेम –आदर-विश्वास-संयम-नैतिकता-साधना-योग-ब्रह्मचर्यादयाः गुणाः ये व्यक्तौ विद्यमानाः भवन्ति ते गुणाः हि आध्यात्ममुच्यते।

प्रज्ञायाः अर्थः- सामान्यबुद्धिरपेक्षया सत्यनिष्ठायुक्ता ईश्वरप्रेमसहितं निर्मलबुद्धिः च प्रज्ञा वर्तते।

अतः आध्यात्मिकप्रज्ञायाः तात्पर्यम् तादृश्या बुद्धया वर्तते या आत्मापरमात्मासम्बद्धा सत्यनिष्ठायुक्तनिर्मलप्रेमयुक्तश्रद्धाविश्वाससंयमनैतिकतासाधनायोब्रह्मचर्यादिगुणेभ्यः भवति।

ईश्वरस्य प्रत्येकशरीरे अन्तरात्मरूपेण विद्यमानः स्वभावः एव अध्यात्मः इति । मानवेषु आध्यात्मिकगुणानां विकासः एव आध्यात्मिकप्रज्ञाः इति कथ्यते ।

श्रीमद्भगवतगीतायाः सप्तदशेऽध्याये श्लोक सं. 2 तः 22 पर्यन्तं सात्विकव्यक्तेः स्वभावः वर्णितः अस्ति तद् आध्यात्मिकप्रज्ञायाः लक्षणं वर्तते ।

अष्टादशेऽध्याये 29-30 तथा च श्लोकेषु 33 मध्ये सात्विकबुद्धेः यानि लक्षणानि वर्तन्ते तानि सर्वाणि आध्यात्मिकप्रज्ञायाम् अन्तर्भवति । श्री अरविन्दमहोदयः स्वग्रन्थे गीताप्रबन्धे बुद्धियोगनामकेऽध्याये साधारणबुद्धौ आध्यात्मिकप्रज्ञायां भेदो स्पष्टः कृतवान् ।

भारतीयदर्शनेषु उपनिषत्सु अथर्ववेदस्य केषुचित् अनुभागेषु आध्यात्मिकतायाः वर्णनं वर्तते । यस्योल्लेखः शोधप्रबन्धे अस्ति ।

## पाश्चात्यसन्दर्भे आध्यात्मिकप्रज्ञाः

आध्यात्मिकप्रज्ञा एतादृशी क्षमतायाः सूचकः वर्तते । यस्मात् अस्माभिः स्वजीवनस्य परिस्थितिषु अर्थनिरूपण- सन्दर्भीकरण- रूपान्तरणस्य प्रक्रियाः सहजरूपेण विकसिताः क्रियते।

(Donah zohar & Iam Manshall)

 ISSN 2394-6059

आध्यात्मिकप्रज्ञायाः सम्प्रत्ययस्य विकासाय Donah zohar & Iam Manshall महोदयः प्रमुखं योगदानं दत्तम् । अनेन महोदयेन आध्यात्मिकप्रज्ञा निम्नरूपेण निरूपिता।

- Self-awareness (स्वात्मजागरूकता) ज्ञानमिदं यत् वयं के?
- Vision & values led (मूल्यं दृष्टिकोणञ्च) मानवतावादीविचारधाराः।
- The capacity of face and use adversity (स्वन्यूनतानां दुर्बलतानां च निवारणस्य क्षमता) स्वत्रुटीभ्यः शिक्षागृहणं स्वविकासश्च।
- To be her holistic (समग्रतावादी दृष्टिकोणम्) विविधवस्तुषु अन्तर्सम्बन्धस्य प्रवृत्तिः।
- Diversity (विविधता) विविधतायाः स्वीकरणस्य क्षमता।
- Field independence courage (स्वतन्त्रविचाराधारायाः विकासः) परम्परेतरस्य कार्यकरणस्य विचारः।
- The Temdenay to askiehij (प्रत्येकवस्तुज्ञानस्य विचारधारा) वस्तु किम्? एतस्य ज्ञानाय प्रवृत्तिः।
- The ability to re-frame (पुनः संरचितयोग्यता) सर्जनात्मकतायाः शक्तिः।
- Spontaneity (स्वाभाविकप्रतिक्रिया) भयं विना उत्तरदायीत्वपूर्ण प्रतिक्रिया प्रदानस्य क्षमता।

Dunah zohen महोदयस्य मतमस्ति यत् कस्मिन्नपि मनुष्ये आध्यात्मिकप्रज्ञायाः ज्ञानाय उपरोक्तेषु लक्षणेषु वा अधिकांशघटकानाम् आवश्यकता भवति। अधः आध्यात्मिकप्रज्ञायाः अवधारणा स्पष्टीयते।

आध्यात्मम् – आध्यात्मं स्वविषये चिन्तनस्य विवेकपूर्णकार्यकरणक्षमतायाः जागरूकतायाः च शक्तिः ददाति। अधिकाः जनाः स्वीकुर्वन्ति यत् तेषाम् अभिज्ञानं शरीरेण भवति । अतएव ते चिन्तयन्ति यत् तेषां परिचयः राष्ट्रियता- प्रजाति- लिङ्ग -व्यवसादिभ्यः गुणेभ्यः वर्तते। इयं स्वविषये त्रुटीपूर्णावधारणा वर्तते। यतोहि वास्तविकरूपेण इयम् अस्ति तर्हि जीवने भयः क्रोधः किमर्थं भवति। यदि आध्यात्मिक दृष्ट्या वयं पश्यामः तर्हि अप्राकृतिकभावना सर्वदा अहंकारस्य परिणामः भवति। या अस्माकं वास्तविक आध्यात्मिकभावनां अवरूद्धयति।

**प्रज्ञा –**

प्रज्ञा आसन् उचितदृष्टिकोणस्य उचितस्थानस्य उचितमार्गस्य चयनाय दृष्टिं यच्छति। उदाहरणेन वयं यदि वयं आध्यात्मिकाः स्मः तर्हि दुःखस्य अनुभूतिः न भवितुम् अर्हति। आध्यात्मिकशक्तिः अस्मान् प्रेरयति। आध्यात्मिकशक्तिः अस्मासु स्वीकरणस्य अग्रेसरणस्य च प्रवृत्तिः जनयति। यदि वयं आध्यात्मिकाः तर्हि यदि कोऽपि अस्माकं

वस्त्राणि वर्णादि रूपं दृष्ट्वा नकारात्मकं वदति। तर्हि अस्मासु प्रभावः न भवति कारणं तु वयं जानीमः यत् अस्माकं सुष्ठुसुन्दरता अस्माकं चरित्रे स्वभावे च वसति। एतादृश्यां परिस्थितौ अस्माकं आन्तरिकशक्तिः अस्मान् कर्त्तव्याकर्त्तव्याभ्याम् प्रेरयति। अतः आन्तरिकसात्विक शक्ति एव प्रज्ञा इति कथ्यते।

**आध्यात्मिकप्रज्ञाः–** आध्यात्मिकप्रज्ञा स्वविषये चिन्तने विवेकपूर्ण कार्यकरणाय जागरूकतायैः उत्साहवर्धनाय नैतिकमूल्यानां विकासाय एवं अन्तरात्मशक्तिभि सह शान्तिपूर्ण व्यवहारप्रदर्शनाय शक्तिं प्रददाति तथा च अस्मभ्यम् कृते उचितनिर्णयप्राप्त्यर्थं उचितदृष्टिकोणाय साहाय्यं यच्छति। उचितानुचितयोः भेदज्ञानाय दृष्टिं ददाति। पाश्चात्यविद्वभिः अपि आध्यात्मिकप्रज्ञायैः सम्प्रत्ययीकरणं कृतं उल्लिखितः यस्योल्लेखः शोधप्रबन्धे कृतः।

आध्यात्मिकप्रज्ञाविषये यदि वयं भारतीयपाश्चात्यसन्दर्भौ पश्यामः तर्हि द्वयोर्मध्ये समानता प्रतीयते।

आध्यात्मिकप्रज्ञायाः आयामः -

1. आत्मचेतना/ स्वजागरूकता
2. धार्मिकआस्थौजश्च
3. जीवनमूल्योद्देश्यानि
4. सत्यसमग्रतावादी दृष्टिकोणम्
5. स्वसीमायाः समाकलनम्

## सन्दर्भग्रन्थसूची-


- दास स्वामी रामसुख, गीता प्रबोधिनी, गीताप्रेस, गोरखपुर, 2004
- पाण्डेय, के.पी. नवीनशिक्षा मनोविज्ञान, विश्वविद्यालयप्रकाशन, वाराणसी, 2005
- माथुर, एस.एस. शिक्षा मनोविज्ञान, विनोदपुस्तक मंदिर, आगरा, 1986
- योगी, सदानंद, वेदान्तसार, मोतीलाल बनारसी दास, वाराणसी, 1979
- वर्मा, जगदीशचन्द्र, नैतिकशिक्षा, सौभाग्यप्रकाशन, नई दिल्ली, 1979सिंह शिव बहादुर
- श्री अरविन्द का शिक्षा दर्शन, राधा पब्लिकेशन्स, दिल्ली, प्रथम संस्करण, 2006
- शास्त्री, सुरेन्द्र देव,कठोपनिषद्, चौखम्भा प्रकाशन, विद्याभवन, वाराणसी, 1980
- Sisk, D.A, and Torrance, E.P. Spiritual Intelligence developing higher consciousness. Creative education foundation Buffalo, New York, 2001

 ISSN 2394-6059


- Wigglesworth, cindy. The 21 skills of spiritual intelligence select book; New York. 2012
- Zohar & marshal. SQ; spiritual intelligence the ultimate intelligence bloomsbery. London. 2000